# कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयः

(केन्द्रीयमानवसंसाधनविकाशमन्त्रालययोजनान्तर्गतः, नवदिल्लीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयानुमोदितः)

हेडिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः - ७२१४३०

## कलियाचक-आदर्शवार्ता

वार्षिकी वार्तापत्रिका

● वर्षम् - २०२१-२०२३ ● तृतीयपुष्पम् ● शकाब्दः - १९४३-१९४५ ● विक्रमाब्दः - २०७८-२०८०


Prof. Shrinivasa Varakhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament

[illegible] - [illegible]/2023-24/ [illegible]

दिनाङ्कः - [illegible].07.2023



### वार्तासन्देशः

[illegible]

(प्रो. श्रीनिवास वरखेडी)
कुलपतिः

---

Prof. Ranjit Kumar Barman
Registrar
Central Sanskrit University
Established by an Act of Parliament



### कुलसचिवानां वार्तासन्देशः

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते

महतः प्रमोदस्य विषयोयं यद् जगदम्बायाः भगवत्याः सरस्वत्याः परमानुकम्पया कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयप्रकाशः कलियाचकआदर्शवार्ता इत्याख्या वार्तापत्रिकेयं महाविद्यालये आवर्षं सर्वान् कार्यक्रमान् आधारीकृत्य तृतीयाङ्ककरूपेण आत्मप्रकाशं करोतीति ज्ञात्वा मोदते मे मनः। वार्तापत्रिकेयं महाविद्यालयस्य सारस्वतकार्यक्रमाणां लोकाभिमुखीकरणाय समेषां कृते लाभदायकं भविष्यतीति मे दृढीयान् विश्वासः। एतदर्थं सम्पादकसमेतानां समेषां कृते मदीयमभिनन्दनं पुनः पुनः विनिवेदयामि।

R.K. Barman
प्रो. रञ्जित् कुमार बर्मन्
कुलसचिवः

---

PROF. KISHORE CHANDRA PADHY
CHAIRPERSON,
Management Committee
Kaliachak Bikram Kishore Adarsh Sanskrit Mahavidyalaya

प्रो. किशोरचन्द्रपाढी
अध्यक्षः,
परिचालनसमितिः
कलियाचकविक्रमकिशोरादर्श-
संस्कृतमहाविद्यालयः



### शुभाशंसा

[illegible]

प्रो. किशोर चन्द्र पाढी
परिचालनसमितेः अध्यक्षः

---

KALIACHAK BIKRAM KISHORE ADARSH SANSKRIT MAHAVIDYALAYA

Recognised by : Central Sanskrit University, New Delhi.
(Established by an Act of Parliament)
Under Ministry of Education, Government of India

Celebrating 25 Years of Eminence ★ गौरवस्य पञ्चविंशतिः वर्षाणि









### भारते भातु भारती

कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य आदर्शवार्तापत्रिकायाः तृतीयसंस्करणस्य प्रकाशनं भविष्यतीति आनन्दस्य विषयः। महाविद्यालयेन आयोजितस्य [illegible] कलियाचक-आदर्शवार्ता इत्याख्यपत्रमाध्यमेन प्रकाश्यते इति हर्षमनुभवामि। एतस्याः वार्तापत्रिकायाः उत्तरोत्तराभिवृद्धिकामनापुरस्सरं सर्वेभ्यः हार्दं धन्यवादं वितनोमि।

डॉ. देवीपदः
प्राचार्यः
Dr. Debipada Rath
PRINCIPAL
Kaliachak Bikram Kishore Adarsh Sanskrit Mahavidyalaya
P.O.-Heria, Purba Medinipur, W.B.

# संस्कृतपक्षमहोत्सवः

२०२१तमवर्षस्य अगष्टमासस्य द्वाविंशतिदिनाङ्कतः सेप्टेम्बरमासस्य चतुर्थदिनाङ्कं यावत् आन्तर्जालीयः संस्कृतसप्ताहमहोत्सवो महता वैभवेन सुसम्पन्नः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयानां कुलसचिवानां प्रो. सुब्रह्मण्यशर्ममहोदयानां समुद्घाटनेन कार्यक्रमस्यास्य शुभारम्भः सञ्जातः। श्रीलालबाहादुरशास्त्री-केन्द्रीयसंस्कृतविश्वविद्यालयस्य शैक्षणिकपीठप्रमुखाः प्रो. भागीरथिनन्दमहाभागाः कार्यक्रमेऽस्मिन् मुख्यवक्तृत्वेन समुपस्थिताः आसन्। तत्रोद्यापनसमारोहे मुख्यातिथिरूपेण समागताः आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. के.बि.सुब्बारायुडुमहोदयाः। विशिष्टातिथिरूपेण यादवपुरविश्वविद्यालयस्य दर्शनविभागस्य विभागमुख्याः प्रो. गङ्गाधरकरमहोदयास्तथा च मुख्यवक्तृत्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य धर्मशास्त्रविभागमुख्याः प्रो. अतुलकुमारनन्दमहोदयाः उपस्थिताः आसन्। संस्कृतसप्ताहोत्सवस्य उद्घाटनावसरे उद्यापने च महाविद्यालयप्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः अध्यक्षतां कृतवन्तः। सम्पूर्णकार्यक्रमोऽयं प्राचार्याणां डॉ.देवीपदरथमहोदयानां मार्गदर्शनेन, समन्वयकस्य डॉ.नृसिंहनाथगुरुमहाभागस्य तथा सहसमन्वयकस्य डॉ. दयानन्दपाणिग्राहीमहाभागस्य तत्त्वावधानेन गुगुल्मीट् माध्यमेन समभवत्। अवसरेऽस्मिन् छात्राणां भगवद्गीतावृत्ति-संस्कृतसङ्गीत-सुभाषितकण्ठपाठ- संस्कृतभाषण-संस्कृतरचनानुवाद-स्पर्धाः समायोजिताः। प्रायोजितासु निखिलास्पर्धासु नैके प्रतिभागिनः योग्याः छात्राः पुरस्कृताः।

## तर्पणमाहात्म्यम्

०२१वर्षे पितृपक्षावसरे अक्तोबरमासस्य ०५ दिनाङ्के ''पितृपक्षे तर्पणस्य माहात्म्यम्''इति विषये आन्तर्जालीयचर्च्चासत्रमायोजितम्। तत्र सम्मानितातिथित्वेन कामेश्वरसिंदरभङ्गासंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागाध्यक्षचराः प्रथितयशसः धर्मशास्त्रधुरिणः विद्वान्सः प्रो.वाचस्पतिशर्मात्रिपाठिनस्तथा मुख्यवक्तृत्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयपुरीस्थस्य धर्मशास्त्रविभागाध्यक्षचराः विद्वान्सः प्रो.माधवचन्द्रपण्डामहाभागाः तर्पणमाहात्म्यमाधारीकृत्य छात्रान् उद्बोधितवन्तः। कार्यक्रमेऽस्मिन् श्रीजगन्नाथसंस्कृतविश्वविद्यालयपुरीस्थस्य कुलपतिचराः किञ्च महाविद्यालयस्य प्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः, प्राचार्याः डा.देवीपदरथमहोदयाः तथा चान्ये सर्वे महाविद्यालयसदस्याः अध्यापकाश्चासन्।






## गीताजयन्तीमहोत्सवः

कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालये एकविंशत्यधिक-द्विसहस्रतमवर्षस्य दिसम्बरमासस्य अष्टादशदिनाङ्के शनिवासरे गीताजयन्तीमहोत्सवः महता वैभवेन परिपालितः। कार्यक्रमोऽयं प्रो. किशोरचन्द्रपाढीमहोदयानां सभाध्यक्ष्ये सम्पन्नः। यत्र मुख्यातिथित्वेन आचार्यः प्रो. हरेकृष्णमहापात्रः, सारस्वतातिथिरूपेण डॉ. केशवचन्द्रमहापात्रश्च उपस्थिताः आसन्।










## नवीनसम्मेलनकक्ष- अतिथिकक्षयोः शुभोद्घाटनम्


महाविद्यालयस्य प्राशासनिकभवनस्योपरितले दिसम्बरमासस्य चतुर्दशदिनाङ्के (१४-१२-२०२१)केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां प्रो.के.वी.सुब्बरायुडुमहोदयानां तथा कुलसचिवानां प्रो.सुब्रह्मण्यशर्ममहाभागानां करकमलाभ्यां नवीनसम्मेलनकक्ष- अतिथिकक्षयोः शुभोद्घाटनं आन्लाइन् माध्यमेन समभवत्। अमुस्मिन् कार्यक्रमे महाविद्यालयप्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः आध्यक्ष्यं कृतवन्तः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन निर्मितप्रकोष्ठद्वयस्य उद्घाटनपूर्वकमाशीर्भिः अस्मान् प्रचोदितवद्भ्यः कुलपति-कुलसचिवमहोदयेभ्यः तथा महाविद्यालयप्रबन्धनसमितेः अध्यक्षेभ्यः अस्माकं प्रियप्राचार्याः डा.देवीपदरथमहोदयाः कार्तज्ञ्यवचांसि व्याहृतवन्तः।




## सूर्यनमस्कारः

सानन्देन सोत्साहञ्च सूर्यनमस्कारः इति कार्यक्रमः द्वाविंशत्यधिकद्विसहस्रतमवर्षस्य फब्रवरी मासस्य पञ्चविंशतितमे दिनाङ्के गुरुवासरे मान्यवराणां प्रो. किशोरचन्द्रपाढिमहाशयानां तथा महाविद्यालयस्य समेषामध्यापकानां छात्राणाञ्च उपस्थितौ सुसम्पन्नः।








## राष्ट्रियमतदातृदिवसः

राष्ट्रियमतदातृदिवसोऽयं द्वाविंशत्यधिकद्विसहस्रतमवर्षस्य जानुयारिमासस्य पञ्चविंशतितमे दिनाङ्के मङ्गलवासरे महाविद्यालयप्रबन्धनसमितेः अध्यक्षपादानामुपस्थितौ आन्तार्जालमाध्यमेन समायोजितः।








## प्रजातन्त्रदिवसः- २०२२

२६/०१/२०२२तमे दिनाङ्के महाविद्यालयपरिसरे प्रजातन्त्रदिवसः परिपालितः। तत्र राष्ट्रियध्वजायाः समुत्तोलनपूर्वकं भारतमातुः वीरसन्तानानां नामस्मरणमभवत् । भारतवर्षस्य गौरववर्धनाय अस्मदीयैः आचार्यैः डॉ. देवीपदरथमहोदयैः प्रजातन्त्रदिवसस्य महत्त्वं सुष्ठु प्रतिपादितम् ।


## दानवीरविक्रमकिशोरसाऊस्मृतिव्याख्यानम्


**दिनाङ्कः - १५.०२.२०२२**












## नूतनश्रेणीगृहस्य शिलान्यासः

अस्माकं महाविद्यालयस्य प्राचार्याणां डा.देवीपदरथमहोदयानां पौरोहित्येन ०९-०३-२०२२ तमे दिनाङ्के नूतनश्रेणीगृहस्य शिलन्यासकार्यक्रमः अभूत्। अत्र केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो.सुब्रह्मण्यशर्ममहाभागाः आन्लाइन् माध्यमेन उपस्थिताः आसन्।








## परीक्षाचर्चा

मान्यमान्यानां कुलपतिनामाचार्याणां श्रीमतां प्रो. श्रीनिवासवरखेडी महाभागानां सोपस्थितौ आन्तर्जालेन द्वाविंशत्यधिकद्विसहस्रतमवर्षस्य अप्रैल मासस्य प्रथमे दिनाङ्के ''परीक्षा पे चर्चा '' इति कार्यक्रमः महाविद्यालयस्य सभाङ्गणे परिपालितः। यत्र यशस्वी मान्यवरप्रधानमन्त्री श्रीनरेन्द्रमोदी महाशयः छात्राणां बौधिकशक्तेः विकाशाय अत्यन्तमुद्बोधकं सम्भाषणमयच्छत् ।





## एकदिवसीया राष्ट्रियसंगोष्ठी

कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य वित्तीयानुदानेन ऐषमः 23/03/2022 तमे दिनाङ्के "योगः कर्मसु कौशलम्" इति शीर्षकमाधारीकृत्य एकदिवसीया राष्ट्रियसंगोष्ठी महता वैभवेन समायोजिता। डॉ.राजेन्द्रप्रसादकेन्द्रीयकृषिविश्वविद्यालयस्य कुलाधिपतिवराः मान्याः प्रो. प्रफुल्लकुमारमिश्रवर्याः अस्यां मुख्यातिथिपदं व्यभूषयन् । कार्यक्रमस्यास्य उद्घाटकाः मान्यवराः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः प्रो.श्रीनिवासवरखेडीमहाभागाः समभूवन् । उपस्थिताः आसन् श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिस्तथा महाविद्यायप्रबन्धनसमितेरध्यक्षाः वैयाकरणकोकिलाः मान्याः प्रो. किशोरचन्द्रपाढी महाभागाः, एवमेव तत्रत्याः धर्मशास्त्रविभागाध्यक्षचराः आचार्याः प्रो. जयकृष्णमिश्रवर्याः। अस्यां सङ्गोष्ठ्यां महान्तः विद्वांसः विविधशास्त्रपारङ्गताः पण्डितप्रवराः समुपस्थाय स्वस्ववैदुष्यपूर्णपत्रवचनैः सङ्गोष्ठीमिमां सफलीमकार्षुः।










# संस्कृतसम्भाषणशिविरम्

अखिलभारत-अमृतवाणीसेवाप्रतिष्ठानस्यानुकूल्येन अस्मदीयमहाविद्यालये दशदिवसीयसंस्कृतसम्भाषणशिविरं 30/03/2022 त: 0 /04/2022 पर्यन्तं प्रायोजितमभवत्। अत्र प्रमुखशिक्षकरूपेण पण्डित: तपनकुरमारपण्डा, श्रीमान् जयप्रकाशशास्त्री, डा. नारायणसामाइ प्रमुखा: उपस्थिता आसन् । शिविरमिदं प्राचार्याणां डा. देवीपदरथमहाभागानां प्रत्यक्षतत्त्वावधानेन प्राचलत् । शिविरस्य समापनसमारोहे महाविद्यालयपरिचालनसमितेरध्यक्षा: प्रो. किशोरचन्द्रपाढी महोदया: समुपस्थाय 'व्यक्तित्वनिर्माणे' संस्कृतम् इति विषये स्वकीयं सारगर्भकं भाषणं प्राददात्। अन्ते नृत्य-सङ्गीत–नाटकादिभिच्छात्रा: स्वप्रतिभाया: प्रदर्शनं कृतवन्त:।











# संस्कृतबालमहोत्सव:

अस्माकं महाविद्यालयस्य कुशलिन: छात्रा: प्राथमिकविद्यालयस्तरे अध्ययनरतानां बालानां संस्कृते अभिरुचिवर्धनाय विभिन्नेषु प्राथमिकविद्यालयेषु बालशिविराणि आयोजितवन्त:। बालशिविराणां समापनसमारोह: अस्माकं महाविद्यालयपरिसरे ०४-०५-२०२२ तमे दिनाङ्के भव्यतया सम्पन्नो जात:। प्राचार्याणां डा. देवीपदरथमहाभागानां आध्यक्षेण आयोजितेऽस्मिन् बालसंस्कृतमहोत्सवे समे छात्रा:, प्राध्यापका:, कर्मचारिणश्चोपस्थिता: आसन् ।

# सुन्दरकाण्डपारायणम्

श्रीरामनवमीमुपलक्ष्य अस्मन्महाविद्यालयस्य पावनपरिसरे द्वाविंशत्यधिक-द्विसहस्रतमवर्षस्य अप्रैल मासस्य द्वादशदिनाङ्के मङ्गलवासरे प्रात: सार्द्धनववादने श्रीमद्वाल्मीकिरामायणस्य सुन्दरकाण्डपारायणमित्याख्य: कार्यक्रम: महाविद्यालयपरिवारसदस्यै: सर्वै: अध्यापकै: अन्तेवासिभिश्च मिलित्वा परिपालित:।






## संस्कृतज्ञस्वातन्त्र्यवीरस्मृतिव्याख्यानमाला

केन्द्रीयसंस्कृतविश्वविद्यालयस्य मार्गदर्शनेन स्वातन्त्र्यामृतमहोत्सवान्तर्गता संस्कृतज्ञस्वातन्त्र्यवीरस्मृतिव्याख्यानमाला ०८.०६.२०२२ दिनाङ्कतः १५.०६.२०२२ दिनाङ्कं यावदस्माकं महाविद्यालये आन्तर्जालमाध्यमेन समायोजिता। अष्टमदिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. श्रीनिवासवरखेडीमहोदयाः व्याख्यानमालायाः शुभोद्घाटनं कृतवन्तः। तत्र नवमदिनाङ्के श्रीकामेश्वरसिंदरभङ्गासंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागाध्यक्षचराः प्रो.वाचस्पतिशर्मत्रिपाठिनः धर्मशास्त्रे स्वातन्त्र्योत्तरवादनिर्णयप्रक्रिया इति विषये, दशमदिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य वित्तीय-अधिकारिणः डॉ.मधुकेश्वरभट्टमहोदयाः स्वतन्त्रतासंग्रामे संस्कृतज्ञानां योगदानमिति विषये, तत्र एकादशदिनाङ्के अस्यैव विश्वविद्यालयस्य केन्द्रीययोजनानिदेशकाः प्रो.आर्.गायत्रीमुरलीकृष्णमहोदयाः स्वातन्त्र्योत्तरभारतीयशिक्षणव्यवस्थामाश्रित्य,












## अन्ताराष्ट्रिययोगदिवससमारोहः

जून् मासस्य पञ्चदशदिनाङ्कादारभ्य एकविंशतिदिनाङ्कं पर्यन्तं महाविद्यालयपरिसरे महता वैभवेन अन्ताराष्ट्रिययोगदिवससमारोहः परिपालितः। सप्तदिवसीये अस्मिन् कार्यक्रमे प्रथमदिनचतुष्टये (१५-०६-२०२२ तः १९-०६-२०२२) कार्यशालायाः आयोजनमासीत्। तन्मध्ये १६-०६-२०२२ तमे दिनाङ्के शान्तये प्रीतये च योगः इत्यधिविषयं भाषणस्पर्धा छात्रेषु समायोजिता। सप्तदशदिनाङ्के योगासनस्पर्धा तथा ऊनविंशतितारिकायां पुरस्कारवितरणस्यायोजनं समभवत्। कार्यशालायां प्रशिक्षकत्वेन श्रीसुकुमारप्रधानमहोदयः प्रसिद्धयोगाचार्यः आसीत्। २१-०६-२०२२ दिनाङ्के समापनसमारोहे मुख्यातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदर्शयोजनाविभागप्रमुखाः आर्.जी.मुरलीकृष्णमहोदयाः,सम्मानितातिथिरूपेण महाविद्यालयप्रबन्धनसमितेः सदस्याः प्रो. वच्चाभारतीमहाभागाः तथा अध्यक्षरूपेण महाविद्यालयप्रबन्धनसमितेः मुख्याः प्रो.किशोरचन्द्रपाढीमहोदयाः समुपस्थिताः आसन्। कार्यक्रमोयं प्राचार्याणां डा.देवीपदरथमहोदयानां निर्देशेन तथा अध्यापकानां किंशुकसाहा-सञ्जयअग्निहोत्रि-अमरेन्द्रकुमारमिश्रप्रभृतीनां साहाय्येन परिपूर्णतामगात्।


# अमृतभारतीवैभवमहोत्सवः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य मार्गदर्शनेन कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालये अमृतभारतीवैभवमहोत्सवः ०६-०८-२२ तः १६-०८-२२ पर्यन्तं महता वैभवेन सुसम्पन्नः। अगष्टमासस्य षष्ठदिनाङ्के प्रातः भ्रमणपुरस्सरम् उद्‌घाटनमहोत्सवः समायोजितः।सप्तमदिनाङ्के विविधेषु ग्रामेषु संस्कृतप्रचारपुरस्सरं शोभायात्रायाः आयोजनं किञ्च संस्कृतभाषाबोधनवर्गस्यायोजनमप्यभवत्। अष्टमदिनाङ्के प्रातः राष्ट्रियध्वजैस्सह छात्राणां दीर्घधावनं ( गण दौड ) , नवमदिनाङ्के कलियाचक-आर्यतनयाविद्यालये संस्कृतसम्भाषणशिविरस्य( ०९-०८-२०२२ तः १५-०८-२२ यावत् ) प्रारम्भः , दशमदिनाङ्के राष्ट्रियध्वजैस्सह ग्रामेषु संस्कृतसुभाषितसूक्तिभिः वैदिकमन्त्रैः, राष्ट्रियोद्‌घोषैश्च संस्कृतप्रचारः , एकादशदिनाङ्के विश्वसंस्कृतदिवसे केन्द्रीयसंस्कृतविश्वविद्यालयस्य शैक्षिकनिदेशकानां प्रो.बनमालीविश्वालमहाभागानां भाषणेन संस्कृतमेलनमिति कार्यक्रमस्य आन्तर्जालमाध्यमेन आयोजनम्, द्वादशदिनाङ्के महाविद्यालयपरिसरे भाषाबोधनवर्गस्य समापनम्, त्रयोदशदिनाङ्के महाविद्यालयपक्षतः प्रत्येकं गृहे त्रिरङ्गध्वजः ( हर् घर् तिरङ्गा) इति कार्यक्रमस्यायोजनम्, प्रतिगृहं गत्वा त्रिरङ्गध्वजस्य वितरणं स्थापनञ्च , चतुर्दशदिनाङ्के हेंडियाबाजार इति स्थानके संस्कृतप्रचारविवरणपत्राणां छात्रैः वितरणम्, पञ्चदशदिनाङ्के प्रातः प्रभातभ्रमणं (प्रभात फेरी) तथा यथासमयं स्वतन्त्रताध्वजारोहणपर्वणः आयोजनेन साकं शोभायात्रायाः आयोजनम्, सञ्चालितस्य संस्कृतसम्भाषणशिविरस्य उद्यापनम्, किंच अपराह्णे संस्कृतसप्ताहान्तर्गत-आन्तर्जालीयस्पर्धाः, एकादशदिवसे षोडशदिनाङ्के अमृतभारतीवैभवकार्यक्रमस्योद्यापनमित्येते कार्यक्रमाः महता आनन्देन सञ्जाताः। तत्र आधारपुरुषरूपेण अनलाइन्माध्यमेन उपस्थाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिववराः प्रो. एस्.सुब्रह्मण्यशर्माणः, आदर्शपरियोजनयाः निदेशकाः प्रो. आर्.जी.मुरलीकृष्णमहोदयाः मुख्यवक्तृत्वेन तथा महाविद्यालयप्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहाशयाः अध्यक्षरूपेणोद्यापनसभां विमण्डितवन्तः। अन्ते छात्राः नैके सांस्कृतिककार्यक्रमाः प्रदर्शितवन्तः।





















## शिक्षकदिवससमारोहः - २०२२

डॉ.सर्वपल्लिराधाकृष्णन्महोदयस्य जन्मदिवसे सितम्बरमासस्य पञ्चमे दिनाङ्के महाविद्यालयपावनपरिसरे महासमारोहेन शिक्षकदिवसः समायोजितः। महाविद्यालयप्राचार्यस्य डॉ. देवीपदरथमहोदयस्य आध्यक्ष्ये आयोजितेऽस्मिन् समारोहे न केवलं सर्वेऽन्तेवासिनो अपि तु अध्यापकाः कर्मचारिणश्च अपस्थिता आसन् ।






## गीता सुगीता कर्त्तव्या

अस्मन्महाविद्यालये दिसम्बरमासस्य ०५ दिनाङ्कादारभ्य ११ दिनाङ्कपर्यन्तं गीताजयन्तीमहोत्सवमुपलक्ष्य सप्तदिवसीयगीतापारायणकार्यक्रमः महद्धर्षप्रकर्षेण परिपालितः। सर्वे महाविद्यालयस्य अध्यापकाः,शिक्षाकर्मिणः , छात्राः छात्र्यश्चोपस्थाय कार्यक्रमस्यास्य साफल्यतायै सप्ताहपर्यन्तं गीतापाठं कृतवन्तः।





## जनजातीयगौरवदिवसः

१५-११-२०२२ तमे दिनाङ्के भगवान् विर्सामुण्डा जन्मवर्षिकिमुपलक्ष्य जनजातीयगौरवदिवसः महता समारोहेण महाविद्यालये परिपालितः। तत्र भारतस्य स्वतन्त्रतायै भगवान् विर्सामुण्डा महाभागस्यावदानविषये छात्राः महाविद्यालयस्य प्रबन्धनसमितेः अध्यक्षैः प्रो.किशोरचन्द्रपाढीवर्यैः सम्बोधिताः।










## रजतजयन्तीसमारोहस्योद्घाटनम्

महाविद्यालयस्य पञ्चविंशतिवर्षपूरणस्यावसरे गौरवस्य पञ्चविंशतिवर्षाणि इत्युद्घोषवाक्यमाधारेण रजतजयन्तीवर्षपरिपालनोत्सवस्य उद्घाटनसमारोहः ११-१०-२०२२ तमे दिनाङ्के अभूत्। तत्र कार्यक्रमस्यास्य समुद्घाटकत्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य सम्माननीयाः यशस्विनः कुलपतयः प्रो.श्रीनिवासवरखेडी महोदयाः आन्लाइन् माध्यमेन समुपस्थिताः आसन्। तत्र छात्राः कथं संस्कृतमातुः संरक्षकाः भवेयुः तदाधारेण स्वीयभाषणं प्राददुः। छात्राः संस्कृतव्रतिनो भूत्वा राष्ट्रोत्रायकाः भूयासुः इति प्रबोधयन्तः महाविद्यालयस्य मङ्गलकामनापूर्वकं आशीर्वादं प्रदाय कार्यक्रमस्य समुद्घाटनमकार्षुः।तत्र महाविद्यालयस्य प्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः, प्राचार्याः डा.देवीपदरथमहोदयाः तथा च सर्वे महाविद्यालयीयाः समुपस्थिताः आसन्।










## दीक्षारम्भकार्यक्रमः


केन्द्रीयसंस्कृतविश्वविद्यालयस्य निर्देशानुसारं २०२२-२०२३ शैक्षिकसत्रस्यारम्भे ०७-११-२२ तः १८-११-२२ पर्यन्तं छात्राणां दीक्षारम्भकार्यक्रमः तथा व्याख्यानमालायाः आयोजनं महाविद्यालयपरिसरे अभवत्।अस्मिन्नवसरे छात्राणां बौद्धिकविकासाय अभिवृद्धये च निर्दिष्टव्याख्यानानि प्रबुद्धैः अध्यापकैः प्रदत्तानि। अत्र संस्कृतेन सह अन्तर्जाल-प्रौद्योगिकविषयाश्चासन्।









## दशदिवसीयसम्भाषणशिविरम्

२०२२-२३ शिक्षावर्षस्य सत्रारम्भावसरे छात्राणां संस्कृतभाषाभ्यासवर्द्धनाय दिनाङ्क-०७-११-२०२२ तः आरभ्य १८-११-२०२२ यावत् प्राचार्याणां डा.देवीपदरथमहोदयानां निर्देशानुसारं संस्कृतसम्भाषणशिविरस्यायोजनमभूत्। अखिलभारत-अमृतवाणीसेवाप्रतिष्ठानस्यानुकूल्येन शिविरमिदं परिचालितम्। शिविरस्यास्य शिक्षकरूपेण श्रीतपनकुमारपण्डा - श्रीजयप्रकाशशास्त्रि-नारायणसामाइप्रमुखाः आसन्।समापनदिवसे महाविद्यालयस्य प्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः मुख्यातिथित्वेनोपस्थाय छात्रान् सर्वान् सनाथितवन्तः।









# पश्चिमवङ्गराज्यस्तरीया शास्त्रीयस्पर्धा- 2022-23

संस्कृतपारम्परिकशास्त्राणां सर्वभारतीयस्तरे सम्बर्द्धनाय, प्रचाराय, प्रसाराय च भारतसर्वकारस्य शिक्षामन्त्रालयाधीन -नवदेहलीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयानुकूल्येन प्रतिवर्षं समायोज्यते अखिलभारतीयशास्त्रीयस्पर्धा। तदानुसङ्गिकतया राज्यस्तरीयस्पर्धाः आयोजयितुं सर्वभारतीयस्तरे विविधराज्येषु तत्तराज्यस्तरीयायोजकसंस्थापक्षतः परिसराणां पक्षतश्च २०२२ दिसम्बरमासस्य पञ्चदशदिनाङ्कः अन्तिम इति निर्धारितः आसीत्। अस्मिन् वर्षे प्रप्रथमतया दिसम्बरमासस्य द्वादशदिनाङ्के १२-१२-२२ पश्चिमवङ्गस्थमेदीनिपुरमण्डलान्तर्गतेन कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयेन पश्चिमवङ्गराज्यस्तरीयशास्त्रीयस्पर्धा स्वीयमहाविद्यालयपरिसरे आयोजिता। अत्र पश्चिमवङ्गस्थितविविधेषु पाम्परिकसंस्कृतविश्वविद्यालय/महाविद्यालयादिषु भागग्रहणाय छात्राः मार्गदर्शकाश्च समागताः। पश्चिमवङ्गे विद्यमानासु नैकासु संस्थासु यथा १. श्रीसीतारामवैदिकआदर्शसंस्कृतमहाविद्यालयः,कोलकाता, २. रामकृष्णमिशन्- विवेकानन्दशैक्षणिकशोधसंस्थानम् ३. रामकृष्णमिशन् विद्यामन्दिरम्,कोलकाता, ४. रामकृष्ण-आवासीयसंस्कृतमहाविद्यालयः, नरेन्द्रपुरम्, कोलकाता, ५. कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः,पूर्वमेदिनीपुरम्, प्रमुखाः प्रतियोगितायामस्यां भागमग्राहीसुः। प्रतियोगितानां निर्णायकत्वेन आखिलभारतस्तरे प्रतिष्ठिताः विद्वान्सः तत्र समाहूताः आसन्।आयोजितासु स्पर्धासु पञ्चशिक्षानुष्ठानानां ६९छात्राः भागगृहीतवन्तः तथा तेषां मार्गदर्शकत्वेन पञ्च अध्यापकाः आगतवन्तः। महाविद्यालयस्य सर्वेऽपि अध्यापकाः महता श्रमेण सर्वमपि कार्यं संसाधितवन्तः। अस्याः स्पर्धायाः आयोजनपरिषदि महाविद्यालयस्य प्राचार्याः डॉ.देबीपदरथमहेदयाः आवाहकत्वेन , समन्वयकत्वेन डॉ.किंशुकशाहा, किं च संयोजकत्वेन डॉ.संकर्षणपण्डा, डॉ.नृसिंहनाथगुरुः, डॉ.दयानन्दपाणिग्रहिप्रमुखाः आसन्।














## नाट्यकार्यशाला

अखिलभारतीयरूपकमहोत्सवनिमित्तं चयनाय छात्राणां कलाकौशलं परिवर्द्धनाय एकस्याः पञ्चदिवसीयकार्यशालायाः आयोजनमभूत्। तत्र प्रशिक्षकरूपेण पुरीस्थश्रीसदाशिवपरिसरस्य सर्वदर्शनविभागस्याध्यापकः नाट्यकलाकुशीलवाः डॉ.सुव्रतषड्ङ्गी महोदयाः आगत्य कलाप्रियान् छात्रान् नाट्यशास्त्रानुगुणमभिनयादिकं शिक्षयामासुः। डा.देवीपदरथमहोदयानां निर्देशानुसारं सम्पूर्णः कार्यक्रमः परिचालितोऽभूत्। कार्यशालायाः अस्याः समन्वयकः डॉ.अमरेन्द्रकुमारमिश्रः, संयोजकौ डॉ.संकर्षणपण्डा तथा डॉ.दयानन्दपाणिग्राही चादयः आसन्।





## क्षेत्रीयरूपकसहोत्सवः

संस्कृतकलासाहित्यनाटकाभिनयेषु छात्राणामन्तर्निहितकलानां विकासाय केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा प्रायोजिते रूपकमहोत्सवे यशस्विकुलपतीनां प्रो.श्रीनिवासवरखेडीमहोदयानां सततप्रयासेन प्रथमवारं आदर्शसंस्कृतमहाविद्यालयानां योगदानमभवत् २०२२ तमे वर्षे। चतुर्षु वलयेषु समेषां केन्द्रीयसंस्कृतविश्वविद्यालयस्थ -परिसराणां तथा सम्बद्ध-आदर्शमहाविद्यालयानां शोधसंस्थानानाञ्चात्र विभाजनं कृत्वा सर्वादौ क्षेत्रीयस्तरे स्पर्धाः अभवन्। पूर्वोत्तरवलयान्तर्गत–एकादशसंस्थासु पुरीस्थे श्रीसदाशिवपरिसरे आयोजितायां स्पर्धायामस्मदीयमहाविद्यालयः श्रीरूपगोस्वामिकृतं 'ललितमाधवम्' इति नाटकं प्रस्तूय तृतीयस्थानमवाप्तम्। एतेन राष्ट्रियरूपकमहोत्सवाय योग्यताप्यवाप्ता। अत्र अस्माकं छात्रः अरित्रमवेरा श्रेष्ठाभिनेतृरूपेण प्राप्तवान्, तथा श्रेष्ठसंगीतत्वेन अस्माकं महाविद्यालयः पुरस्कारभागभवत्।

## अखिलभारतीयरूपकमहोत्सवः

**दिनाङ्कः ०२.०२.२०२३ तः ०४.०२.२०२३ पर्यन्तम्**

**स्थानम्- केन्द्रीयसंस्कृतविश्वविद्यालयः,श्रीसदाशिवपरिसरः,पुरी**




# क्षेत्रीययुवमहोत्सवः

## दिनाङ्कः १४.०२.२०२३ तः १६.०२.२०२३ पर्यन्तम्

## स्थानम्- केन्द्रीयसंस्कृतविश्वविद्यालयः,श्रीसदाशिवपरिसरः,पुरी





# सप्तमजातीयचर्च्चासत्रम्

## दिनाङ्कः२८.०३.२०२३








## विश्वरङ्गमञ्चदिवसे ललितमाधवं नाटकं नाटितम्

विश्वरङ्गमञ्चदिवसमुपलक्ष्य पश्चिमवङ्गस्थकलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयपक्षत: संस्कृतस्य परिवर्धनार्थं, प्रचाराय प्रसाराय च पूर्वमेदिनीपुरन्तर्गते बालिघाइ इति ग्रामस्थे श्रीजगन्नाथमन्दिराङ्गणे २७-०३-२०२३ दिनाङ्के श्रीरूपगोस्वामिविरचितं ललितमाधवम् इति संस्कृतनाटकं महाविद्यालयच्छात्रै: प्रस्तुतम्। सर्वे नगरजना: नाटकं दृष्ट्वा तद्रसमास्वादितवन्त:। प्राचार्याणां डा देवीपदरथमहोदयानाम् आध्यक्ष्येण, डा.दयानन्दपाणिग्राहिण: तथा च डा.सङ्कर्षणमहोदयस्य च संयोजनेन नाटकमिदं साफल्यमगात्। अस्य निर्देशक: आसीत्पुरीस्थस्य श्रीसदाशिवपरिसरस्य डा.सुब्रतषडङ्गी तथा संचालक: श्रीसुरञ्जनपाहाडी इति अवर्तत।






## जातीयस्पर्धासु विजेतृणां छात्राणां सम्माननम्

११.०५.२०२३






## अखिलभारतीयशास्त्रियस्पर्धा वाराणसी,उत्तरप्रदेश:

२२-०३-२३त: २५-०३-२०२३





## अन्ताराष्ट्रिययोगदिवससमारोह:

दिनाङ्क: २१.०६.२०२३






## रक्तदानशिविरम्

रक्तदानं महद्दानमिति वचनं परिपालयन् लायन्स क्लब् खेजुरी इत्यनया संस्थया साकम् अस्माकं महाविद्यालयः 23.06.2023 दिनाङ्के एकस्य रक्तदानशिविरस्यायोजनमकरोत्। तत्र सर्वेऽप्यध्यापकाः, छात्राः, ग्रामीणाश्च रक्तदानं कृतवन्तः। प्रायशः ३५ युनिट् परिमितं रक्तमत्र संगृहीतमिति महतः आनन्दस्यायं विषयः।
















## कालिदासोत्सवः

### (२४.०६.२०२३)

२४.०६.२०२३ तमे दिनाङ्के आन्तर्जालीयः कालिदासोत्सवः महता वैभवेन सुसम्पन्नः। यत्र व्याख्याता रूपेण राष्ट्रियसंस्कृतविश्वविद्यालयस्य तिरुपतिस्थस्य अनुसन्धानप्रकाशनविभागस्य प्राध्यापकाः डॉ.सोमनाथदाशमहोदयाः कालिदासो विलासः इति विषये सारगर्भकं भाषणं दत्त्वा सर्वेषां चित्तरञ्जनं कृतवन्तः।








## अद्वैतवेदान्तविभागपक्षतः गुरुपूर्णिमा

आषाढशुक्लपूर्णिमातिथौ (०३/०७/२०२३) महाविद्यालयपरिसरे साक्षादान्तर्जालेन च गुरुपूर्णिमामहोत्सवकार्यक्रमः सुसम्पन्नः। मुख्यवक्तारः श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य अद्वैतवेदान्तविभागस्य आचार्यचराः प्रो प्रभातरञ्जनमहापात्रवर्याः 'वन्दे गुरुपरम्पराम्' इति विषयमाधारीकृत्य गुरुपूर्णिमायाः महत्त्वं स्ववैदुष्यपूर्णवचोभिः प्राकटयन्। किञ्च पुरीस्थस्य श्रीनिगमानन्दसारस्वत-आश्रमस्य अध्यक्षाः स्वामिश्रीशङ्करानन्दसरस्वतिमहाराजाः सम्मानितातिथित्वेन उपस्थाय दिवसममुं सनाथीकुर्वन्तः कार्यक्रमस्य शोभामवर्धयन् स्वविचारञ्च प्राकटयन्। कार्यक्रमस्य सञ्चालनं वेदान्तविभागस्याध्यक्षाः डा दयानन्दपाणिग्राहिमहोदयाः कृतवन्तः।डा शङ्कर्षणपण्डामहोदयाः धन्यवादार्पणं कृतवन्तः। शुभेऽवसरेऽस्मिन् महाविद्यालयस्य सर्वेऽप्यध्यापकाः, कर्मचारिणः, छात्राश्चोपस्थिताः आसन् अन्ते शान्तिपाठेन कार्यक्रमोऽयं सानन्दं सोल्लासञ्च सुसम्पन्नः।

## धर्मशास्त्रविभागीयकार्यशाला

धर्मशास्त्रविभागपक्षत: ०४.०७.२०२३तमे दिनाङ्के धर्मशास्त्रमीमांसादर्शनयो: पारस्परिकसम्बन्धविचार: इति विषयमाधारीकृत्य एकदिवसीया कार्यशाला समुनष्ठिता। अत्र आधारपुरुषरूपेण धर्मशास्त्रमर्मज्ञा: श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागाध्यक्षचरा: प्रो. माधवचन्द्रपण्डामहोदया: मुख्यवक्तृत्वेन स्वीयाभिमुख्यं प्रकटयामासु:। किञ्च केन्द्रीयसंस्कृतविश्वविद्यालयस्य परियोजनानिदेशका: प्रो. आर्.जि.मुरलीकृष्णवर्या: तथा च अस्मन्महाविद्यालयप्रबन्धनसमितरध्यक्षपादा: प्रो. किशोरचन्द्रपाढी महाभागा: समुपस्थिता: आसन्।









## पञ्चदिवसीयसंस्कृतसम्भाषणशिविरम्

जुलाईमासस्य सप्तदशदिनाङ्कत: एकविंशतिदिनाङ्कपर्यन्तं जुखियाग्रामस्थिते धुँन्वरनारायणवाणीमन्दिर-उच्चविद्यालये अस्मन्महाविद्यालयपक्षत: पञ्चदिवसीयसंस्कृतसम्भाषणशिविरस्यायोजनमभवत्। अत्र अस्माकं महाविद्यालयस्य छात्रा: प्रशिक्षणं दत्तवन्त:। प्रशिक्षिता: छात्रा: उद्यापनोत्सवे अस्माकं महाविद्यालयपरिसरे संस्कृतसम्भाषणेन सह नृत्यगीतादिकं संस्कृतेन प्रस्तुतवन्त:।









## रजतजयन्त्युत्सवमुपलक्ष्य वृक्षारोपणकार्यक्रम:

दिनाङ्क: ०४.०७.२०२३













## विशिष्टव्याख्यानम्

अस्माकं महाविद्यालय: तथा रामकृष्णमिशन्,कण्टाइ इत्यनयो: मिलितानिकूल्येन स्वामिविवेकानन्दस्य जीवनचरितं शिक्षा तथा नैतिकशिक्षा इत्यधिविषयं विशिष्टव्याख्यानस्यायोजनमभवत्। तत्र रामकृष्णमिशन्,कण्टाइ इत्यस्य स्वामिन: मायाधीशानन्दमहाभागा:, तथा श्रीमन्त: सुकुमारमाइकपमहोदया: सहप्रधानशिक्षकचरा: मुख्यवक्तृरूपेण सभां विमण्डितवन्त:। डॉ.किंशुकसाहा अस्य कार्यक्रमस्य संयोजका: आसन्।







## कलियाचकविक्रमकिशोर - आदर्शसंस्कृतमहाविद्यालयस्य कुलगौरवम्

पथ: पार्श्वे रम्या द्वितलभवने छात्रभरिता ।
गिर: शिक्षासंस्था प्रतिदिनमहो दृक्पथमिता ।।
सदा हिल्लोलैर्या मुखरिततनु छात्रगहना ।
जनैर्दृष्टा दूरान्मुनिभवनकल्पा मठसमा ।।१।।

इयं शिक्षा संस्था सकलजनता मोदकरिणी ।
शुचि: पाठोत्साहे परमरमणीया शुचिभृताम् ।।
नतोत्साहे बद्धा निगडप्रणया पाठसमरे ।
लभन्ते बोधन्ते प्रथितधिषणा: छात्रनिचया: ।।२।।

सदोत्साहे नेता: पठनकुशलाशिक्षकजुष: ।
ह्रिया: मृष्टा विद्याभरितमनसो छात्रनिचया ।।
सतां संज्ञात्सन्तो जितसकलछात्रानतहृद: ।
तत: शिक्षाक्षेत्रं जनगणमन: प्राणभरितम् ।।३।।

सुशीला छात्रा ये नियतपठनाभ्यासनिपुणा: ।
निमग्नापाठादौ हतसकलदोषा: पठनत: ।।
सदोन्नीता राष्ट्रे ह्यपिसकलदेशे गुणिवरा: ।
समाना: सर्वैस्ते पठनमनने न्यस्तहृदया: ।।४।।

विधास्यन्ते शिष्या निजहृदयतुल्या धृतगुणा: ।
निपायाशापूर्णान् पठनविषयान् लोलनियमै: ।।
क्रियाज्ञानं कर्तुं प्रणयभरिता: शिक्षकचया ।
सदोत्साहेनोद्य लिखनपठनाभ्यासकुशला: ।।५।।

कवि:

डॉ. श्रीकण्ठमहापात्र:

प्राक्तन-शास्त्रचूडामणिविद्वान्

## सम्पादकीयम्

२०२०-२०२१तमवर्षस्य आदर्शवार्त्तापत्रिकाया: द्वितीयपुष्पस्य सुखदप्रकाशनानन्तरं तृतीयवारं नवरूपेणात्मानं प्रकाशयन्ती पुन: 'कलियाचक-आदर्शवार्त्ता' नाम्नीयं पत्रिका प्राचार्यसमेतानामस्मत् परिसरीयच्छात्राणाम् अध्यापकानां, शिक्षाकर्मिणां,कर्मचारिणाञ्च वार्षिकी या प्रगति:, या समुन्नति:, तस्या: लोकाभिमुखीकरणाय अस्मदीयप्रयत्नरूपेण बहिरायाति सम्प्रति। वस्तुत: वर्षेऽस्मिन् अस्माभि: महाविद्यालयस्य पञ्चविंशतिवर्षपूर्त्यवसरे ''रजतजयन्त्युत्सव:'' गौरवस्य पञ्चविंशति: वर्षाणि महद्धर्षप्रकर्षेण परिपाल्यते। तदङ्गतया पञ्चविंशति: कार्यक्रमा: परिकल्पिता: परिपालिताश्च। तेषामेव सामान्यतया वार्तामात्रमस्मिन् पुष्पे प्रकाश्यते। अत: अस्मिन् पुष्पे शुभेच्छावार्त्ताप्रदातृभ्यो भारतसर्वकारस्य शिक्षामन्त्रालयाधीन-नवदेहलीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य कुशलप्रशासकेभ्य: यशस्विकुलपतिभ्य: प्रो.डॉ.श्रीनिवासवरखेडिमहोदयेभ्य:, कुलसचिवेभ्य: प्रो.डॉ.रणजितकुमारवर्मन्-महाशयेभ्यश्च कोटिश: कार्तज्ञ्यवचांसि व्याहराम:। किञ्च शुभाशंसया अस्मान् उपकृतवद्भ्य: अस्मन्महाविद्यालयप्रबन्धनसमितेरध्यक्षेभ्य: प्रो.डॉ.किशोरचन्द्रपाढी-महोदयेभ्य: हार्दान् धन्यवादान् प्रकटयाम:। गुणग्राहिण: विद्वत्तल्लजा: विद्वान्स: पत्रिकायामनवधानवशात: समागतदोषाणां टङ्कणगतत्रुटीनाञ्च परिहारपूर्वकं केवलं गुणान् गृह्णन्त्विति विनम्रतया सम्प्रार्थ्यते। अन्ततो भगवत: श्रीजगन्नाथस्य भगवत्या: पराम्बायाश्च कृपाप्रसादाद्वार्त्तापत्रिकेयं सहृदयपण्डितानां विदुषामानन्ददा भवत्विति।



**संरक्षक:**

**प्रो.श्रीनिवासवरखेडी**

कुलपति:



**मार्गदर्शक:**

**प्रो.किशोरचन्द्रपाढी**

प्रबन्धनसमितेरध्यक्ष:



**प्रधानसम्पादक:**

**डॉ.देवीपदरथ:**

प्राचार्य:

**सम्पादका:**



**डॉ.किंशुकसाहा**



**डॉ.सङ्कर्षणपण्डा**



**डॉ.दयानन्दपाणिग्राही**

प्रकाशक:

कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालय:,

हेडिया,पूर्वमेदिनीपुरम्,पश्चिमवंग:-७२१४३०

दूरभाष: - ०३२२० - २७६०३६

ईमेल् - kaliachakbkasm@gmail./yahoo.com

Web http://kaliachakbkasanskritmahavidyalaya.org/